## २७. पाठनं रोचते

(रोचते - चतुर्थी)

मनोरमा - शिक्षिकायाः आगमनपर्यन्तं किञ्चित् पाठविषये एव चिन्तयामः। वदन्तु कस्मै /कस्यै किं रोचते? इति।

शकुन्तला - मह्यं फलं रोचते। लता वदतु भोः।

रागिणी - मह्यम् आनन्दस्य नृत्यं रोचते। तुभ्यं किं रोचते वदतु कार्तिक !

कार्तिकः - कार्तिकाय नाटकवीक्षणं रोचते।

प्रशान्तः - मालत्यै सर्वदा निद्रा रोचते। न वा मालति ?

चूडामणिः - मह्यं संस्कृतगीतं रोचते। भोः आर्ये ! भवत्यै किं रोचते इति प्रथमं वदतु।

मनोरमा - एतस्यै किं रोचते इति कुतूहलं वा ? शृण्वन्तु, मह्यं भाषणं रोचते।

चेतनः - न सर्वे मौनेन उपविशन्तु। शिक्षिका आगतवती।

मदनः - आगच्छतु तस्यै किं रोचते इति पृच्छामः। मान्य(े) ! भवत्यै किं रोचते इति वदति वा ?

शिक्षिका - मह्यं भवतां पाठनं रोचते।